|| श्री गणेशाय नमः ||

Astro • Puja • Vastu

# हरी ॐ धार्मिक पूजा विधी केंद्र

## ज्योतिष आणि वास्तु सल्लागार


योगेशशास्त्री ढवळे (गुरुजी)
Mob. 95944 28749

निलेशशास्त्री ढवळे (गुरुजी)
Mob. 86524 02078

# Shri Annapurna Sahasranama

# श्रीअन्नपूर्णा सहस्रनाम स्तोत्रम्





## SHRI RAJ VERMA JI

**Contact-** +91-9897507933

**WhatsApp No.** +91-7500292413

**Email-** mahakalshakti@gmail.com


**For more info visit---**

www.scribd.com/mahakalshakti

www.gurudevrajverma.com

विनियोग :- ॐ अस्य श्रीअन्नपूर्णा सहस्रनामस्तोत्र मालामंत्रस्य श्रीभगवान् सदाशिव ऋषिः, अनुष्टुप् छन्दः, भगवती श्रीअन्नपूर्णा देवता, हलो बीजं, स्वराः शक्तिः जीवो बीजं बुद्धिः शक्तिः उदानो बीजं सुषुम्ना नाडी सरस्वती शक्तिः, धर्मार्थकाममोक्षार्थे जपे विनियोगः।

ध्यानम् :- सिन्दूराभां त्रिनेत्राम् अमृतशशिकलां खेचरीं रक्तवस्त्रां पीनोत्तुंगस्तन्नाढ्यामभिनवविलसद्यौवनारम्भरम्याम्। नानालंकारयुक्तां सरसिजनयनामिन्दुसंक्रान्तमूर्तिं देवीं पाशांकुशाढ्यामभय वरकरामन्नपूर्णां नमामि।। आदाय दक्षिणकरेण सुवर्णदर्वी दुग्धान्नपूर्णमितरेण च रत्नपात्रम्। भिक्षान्नदाननिरतां नवहेमवर्णामम्बां भजे सकलभूषणभूषितांगीम्।।

श्रीशिव उवाच :- अन्नपूर्णा अन्नदात्री अन्नराशिकृतालया। अन्नदा अन्नपूर्णा च अन्नदानरतोत्सवा।1।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

अनन्ता च अनन्ताक्षी अनन्तगुणशालिनी। अच्युता अच्युतप्राणा अच्युतानन्दकारिणी।2।

अव्यक्ताऽनन्तमहिमा अनन्तस्य कुलेश्वरी। अब्धिस्था अब्धिशयना अब्धिजा अब्धिनन्दिनी।3।

अब्जस्था अब्जनिलया अब्जजा अब्जभूषणा। अब्जाभा अब्जहस्ता च अब्जपत्रशुभेक्षणा।4।

अब्जानना अनन्तात्मा अग्निस्था अग्निरूपिणी। अग्निजाया अग्निमुखी अग्निकुण्डकृतालया।5।

अकारा अग्निमाता च अजयाऽदितिनन्दिनी। आद्या आदित्यसंकाशा आत्मज्ञा आत्मगोचरा।6।

आत्मसूरात्मदयिता आधारा आत्मरूपिणी। आशा आकाशपद्मस्था अवकाशस्वरूपिणी।7।

आशापुरी अगाधा च अणिमादिसुसेविता। अम्बिका अबला अम्बा अनाद्या च अयोनिजा।8।

अनीशा ईशिका ईशा ईशानी ईश्वरप्रिया। ईश्वरी ईश्वरप्राणा ईश्वरनन्ददायिनी।9।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

इन्द्राणी इन्द्रदयिता इन्द्रसूरिन्द्रपालिनी। इन्दिरा इन्द्रभगिनी इन्द्रिया इन्दुभूषणा।।10।

इन्दुमाता इन्दुमुखी इन्द्रियाणां वशंकरी। उमा उमापतेः ओड्याणौ पीठ्वासिनी।।11।

उत्तरज्ञा उत्तराख्या उकारा उत्तरात्मिका। ऋसूता ऋभवा ऋस्था ऋलृकारस्वरूपिणी।।12।

ऋकारा च लृकारा च लृतकप्रीतिदायिनी। एका च एकवीरा च एकारैकाररूपिणी।।13।

ओकारी ओघरूपा च ओघत्रयसुपूजिता। ओघस्था ओघसंभूता ओघधात्री च ओघसूः।।14।

षोडशस्वरसंभूता षोडशस्वररूपिणी। वर्णात्मा वर्णनिलया शूलिनी वर्णमालिनी।।15।

कालरात्रिर्महारात्रिर्मोहरात्रिः सुलोचना। काली कपालिनी कृत्या कालिका सिंहगामिनी।।16।

कात्यायनी कलाधरा कालदैत्यनिकृन्तनी। कामिनी कामवन्द्या च कमनीया विनोदिनी।।17।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

कामसूः कामवनिता कामधूः कमलावती। कामदात्री कराली च कामकेलिविनोदिनी।18।

कामना कामदा काम्या कमला कमलार्चिता। काश्मीरलिप्तवक्षोजा काश्मीरद्रवचर्चिता।19।

कनका कनकप्राणा कनकाचलवासिनी। कनकाभा काननस्था कामाख्या कनकप्रदा।20।

कामपीठस्थिता नित्या कामधामनिवासिनी। कंबुकंठी करालाक्षी किशोरी च ललाटिनी।21।

कला काष्ठा निमेषा च कालस्था कामरूपिणी। कालज्ञा कालमाता च कालधात्री कलावनी।22।

कालदा कालघ्नी कुल्या कुरुकुल्या कुलांगना। कीर्तिदा कीर्तिहा कीर्तिः कीर्तिस्था कीर्तिवर्धिनी।23।

कीर्तिज्ञा कीर्तितपदा कृत्तिका केशवप्रिया। केशिघ्नी केलिकारी च केशवानन्दकारिणी।24।

कुमुदाभा कुमारी च कर्मदा कमलेक्षणा। कौमुदी कुमुदानन्दा कौलिकी च कुमुद्वती।25।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

कोदण्डधारिणी क्रोधा कूटस्था कोटराश्रया। कालकण्ठी करालांगी कालांगी कालभूषणा।26।

कंकाली कामदामा च कंकालकृतभूषणा। कपालकर्तृककरा करवीरस्वरूपिणी।27।

कपर्दिनी कोमलांगी कृपासिंधुः कृपामयी। कुशावती कुण्डसंस्था कौबेरी कौशिकी तथा।28।

काश्यपी कद्रुतनया कलिकल्मषनाशिनी। कंजस्था कंजवदना कंजकिंजल्कचर्चिता।29।

कंजाभा कंजशैलस्था कंजनेत्रा कचोद्भवा। कामरूपा च ह्रींकारी कश्यपान्वयवर्धिनी।30।

खर्वा च खंजनद्वन्द्वलोचना खर्ववाहिनी। खड्गिनी खड्गहस्ता च खेचरी खड्गरूपिणी।31।

खगस्था खगरूपा च खगगा खगसम्भवा। खगधात्री खगानन्दा खगयोनिस्वरूपिणी।32।

खगेशी खेटककरा खगानन्दविवर्धिनी। खगमान्या खगाधारा खगगर्वविमोचिनी।33।

गंगा गोदावरी गीतिर्गायत्री गगनालया। गीर्वाणसुन्दरी गौश्च गाधा गीर्वाणपूजिता।34।

गीर्वाणचर्चितपदा गान्धारी गोमती तथा। गर्विणी गर्वहन्त्री च गर्भस्था गर्भधारिणी।35।

गर्भदा गर्भहन्त्री च गंधर्वकुलपूजिता। गया गौरी च गिरिजा गिरिस्था गिरिसम्भवा।36।

गिरिगह्वरमध्यस्था कुंजरेश्वरगामिनी। किरीटिनी च गदिनी गुंजाहारविभूषणा।37।

गणपा गणका गण्या गणकानन्दकारिणी। गणपूज्या च गीर्वाणा गणपानन्दवर्धिनी।38।

गुरुमाता गुरुरता गुरुभक्तिपरायणा। गोत्रा गौः कृष्णभगिनी कृष्णसूः कृष्णनन्दिनी।39।

गोवर्धनी गोत्रधरा गोवर्धनकृतालया। गोवर्धनधरा गोदा गौरांगी गौतमात्मजा।40।

घर्घरा घोररूपा च घोरा घर्घरनादिनी। श्यामा घनरवाऽघोरा घना घोरार्तिनाशिनी।41।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

घनस्था च घनानन्दा दारिद्र्यघननाशिनी। चित्तज्ञा चिन्तितपदा चित्तस्था चित्तरूपिणी।42।

चक्रिणी चारुचम्पाभा चारुचम्पकमालिनी। चन्द्रिका चन्द्रकान्तिश्च चापिनी चन्द्रशेखरा।43।

चण्डिका चण्डदैत्यघ्नी चन्द्रशेखरवल्लभा। चाण्डालिनी च चामुण्डा चण्डमुण्डवधोद्यता।44।

चैतन्यभैरवी चण्डा चैतन्यघनगेहिनी। चित्स्वरूपा चिदाधारा चण्डवेगा चिदालया।45।

चन्द्रमण्डलमध्यस्था चन्द्राकोटिसुशीतला। चपला चन्द्रभगिनी चन्द्रकोटिनिभानना।46।

चिंतामणिगुणाधारा चिंतामणिविभूषणा। भक्तचिंतामणिलता चिंतामणिकृतालया।47।

चारुचंदनलिप्तांगी चतुरा च चतुर्मुखी। चैतन्यदा चिदानन्दा चारुचामरवीजिता।48।

छत्रदा छत्रधारी च छलच्छद्‌मविनाशिनी। छत्रहा छत्ररूपा च छत्रच्छायाकृतालया।49।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

जगज्जीवा जगद्धात्री जगदानन्दकारिणी। यज्ञप्रिया यज्ञरता जपयज्ञपरायणा।50।

जननी जानकी यज्वा यज्ञहा यज्ञनन्दिनी। यज्ञदा यज्ञफलदा यज्ञस्थानकृतालया।51।

यज्ञभोक्त्री यज्ञरूपा यज्ञविघ्नविनाशिनी। जपाकुसुमसंकाशा जपाकुसुमशोभिता।52।

जालन्धरी जया जैत्री जीमूतजयभाषिणी। जयदा जयरूपा च जयस्थ जयकारिणी।53।

जगदीशप्रिया जीवा जलस्था जलजेक्षणा। जलरूपा जह्नुकन्या यमुना जलजोदरी।54।

जलजास्या जाह्नवी च जलजाभा जलोदरी। यदुवंशोद्भवा जीवा यादवानन्दकारिणी।55।

यशोदा यशसां राशिर्यशोदानन्दकारिणी। ज्वलिनी ज्वालिनी ज्वाला ज्वलत्पावकसंनिभा।56।

ज्वालामुखी जगन्माता यमलार्जुनभंजिनी। जन्मदा जन्महा जन्मा जन्मभूर्जनकात्मजा।57।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

जनानन्दा जाम्बवती जम्बूद्वीपकृतालया। जाम्बूनदसमानभा जाम्बूनदविभूषणा।58।

जम्भहा जातिदा जातिर्ज्ञानदा ज्ञानगोचरा। ज्ञानहा ज्ञानरूपा च ज्ञानविज्ञानशालिनी।59।

जिनजैत्री जिनाधारा जिनामाता जिनेश्वरी। जितेन्द्रिया जनाधारा अजिनाम्बरधारिणी।60।

शंभुकोटिदुराधर्षा विष्णुकोटिविमर्दिनी। समुद्रकोटिगम्भीरा वायुकोटिमहाबला।61।

सूर्यकोटिप्रतीकाशा यमकोटिदुरापहा। कामधुक्कोटिफलदा शक्रकोटिसुराज्यदा।62।

कन्दर्पकोटिलावण्या पद्मकोटिनिभानना। पृथ्वीकोटिजनाधरा अग्निकोटिभयंकरी।63।

अणिमा महिमा प्राप्तिर्गरिमा लघिमा तथा। प्राकाम्यदा वशकरी ईशिका सिद्धिदा तथा।64।

महिमादिगुणोपेता अणिमाद्यष्टसिद्धिदा। जवनघ्नी जनाधीना जामिनी च जरापहा।65।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

तारिणी तारिका तारा तोतला तुलसीप्रिया। तंत्रिणी तंत्ररूपा च तंत्रज्ञा तंत्राधारिणी।66।

ताराहारा च तुलजा डाकिनीतंत्रगोचरा। त्रिपुरा त्रिदशा त्रिस्था त्रिपुरासुरघातिनी।67।

त्रिगुणा च त्रिकोणस्था त्रिमात्रा त्रितनुस्थिता। त्रैविद्या च त्रयी त्रिघ्नि तुरीया त्रिपुरेश्वरी।68।

त्रिकोरदस्था त्रिविधा त्रैलोक्या त्रिपुरात्मिका। त्रिधाम्नी त्रिदशाराध्या त्र्यक्षा त्रिपुरवासिनी।69।

त्रिवर्णा त्रिपदी तारा त्रिमूर्तिजननी त्वरा। त्रिदिवा त्रिदिवेशानी देवी त्रैलोक्यधारिणी।70।

त्रिमूर्तिश्च त्रिजननी त्रिभूस्त्रिपुरसुन्दरी। तपस्विनी तपोनिष्ठा तरुणीताररूपिणी।71।

तामसी तापसी चैव तापघ्नी च तमोऽपहा। तरुणार्कप्रतीकाशा तप्तकांचनसंनिभा।72।

उन्मादिनी तन्तुरूपा त्रैलोक्यव्यापिनीश्वरी। तार्किकी तर्कविद्या च तापत्रयविनाशिनी।73।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

त्रिपुष्करा त्रिकालज्ञा त्रिसंध्या च त्रिलोचना। त्रिवर्गा च त्रिवर्गस्था तपसः सिद्धिदायिनी।74।

अधोक्षजा अयोध्या च अपर्णा च अवन्तिका। कारिका तीर्थरूपा च तीर्थतीर्थकरी तथा।75।

दारिद्र्यदुःखदलिनी अदीना दीनवत्सला। दीननाथप्रिया दीर्घा दयापूर्णा दयात्मिका।76।

देवदानवसम्पूज्या देवानां प्रियकारिणी। दक्षपुत्री दक्षमाता दक्षयज्ञविनाशिनी।77।

देवसूर्दक्षिणा दक्षा दुर्गा दुर्गतिनाशिनी। देवकीगर्भसम्भूता दुर्गदैत्यविनाशिनी।78।

अट्टाट्टहासिनी दोला दोलाकर्माभिनन्दिनी। देवकी देविका देवी दुरितघ्नी तटित्तथा।79।

गण्डकी गल्लकी क्षिप्रा द्वारा द्वारवती तथा। आनन्दोदधिमध्यस्था कटिसूत्रैरलंकृता।80।

घोराग्निदाहदमनी दुःखदुःस्वप्नाशिनी। श्रीमयी श्रीमति श्रेष्ठा श्रीकरी श्रीविभाविनी।81।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

श्रीदा श्रीशा श्रीनिवासा श्रीमती श्रीर्मतिर्गतिः। धनदा दामिनी दान्ता धर्मदा धनशालिनी।82।

दाडिमीपुष्पसंकाशा धनागारा धनंजया। धूम्राभा धूम्रदैत्यघ्नी धवला धवलप्रिया।83।

धूम्रवक्त्रा धूम्रनेत्रा धूम्रकेशी च धूसरा। धरणी धारिणी धैर्या धरा धात्री च धैर्यदा।84।

दमिनी धार्मिणी धूश्च दया दोग्ध्री दुरासदा। नारायणी नारसिंही नृसिंहहृदयालया।85।

नागिनी नागकन्या च नागसूर्नागनायिका। नानारत्नविचित्रांगी नानाभरणमण्डिता।86।

दुर्गस्था दुर्गरूपा च दुःखदुष्कृतनाशिनी। ह्रींकारी चैव श्रींकारी हुंकारी क्लेशनाशिनी।87।

नगात्मजा नागरी च नवीना नूतनप्रिया। नीरजास्या नीरदाभा नवलावण्यसुन्दरी।88।

नीतिज्ञा नीतिदा नीतिर्निर्म्नाभिर्नगेश्वरी। निष्ठा नित्या निरातंका नागयज्ञोपवीतिनी।89।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

निधिदा निधिरूपा च निर्गुणा नरवाहिनी। नरमांसरता नारी नरमुण्डविभूषणा।90।

निराधारा निर्विकारा नुतिर्निर्वाणसुन्दरी। नरासृक्पानमत्ता व निर्वैरा नागगामिनी।91।

परमा प्रमिता प्राज्ञा पार्वती पर्वतात्मजा। पर्वप्रिया पर्वरता पर्वपावन पावनी।92।

परात्परतरा पूर्वा पश्चिमा पापनाशिनी। पशूनां पतिपत्नी च पतिभक्तिपरायणी।93।

परेशी पारगा पारा परंज्योतिःस्वरूपिणी। निष्ठुरा क्रूरहृदया परासिद्धिः परागतिः।94।

पशुघ्नी पशुरूपा च पशुहा पशुवाहिनी। पिता माता च यंत्री च पशुपाशविनाशिनी।95।

पद्मिनी पद्महस्ता च पद्मकिंजल्कवासिनी। पद्मवक्त्रा च पद्माक्षी पद्मस्था पद्मसम्भवा।96।

पद्मास्या पंचमी पूर्णा पूर्णपीठनिवासिनी। पद्मरागप्रतीकाशा पांचाली पंचमप्रिया।97।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

परब्रह्मस्वरूपा च परब्रह्मनिवासिनी। परमानन्दमुदिता परचक्रविनाशिनी।98।

परेशी परमा पृथ्वी पीनतुंगपयोधरा। परावरा पराविद्या परमानन्ददायिनी।99।

पूजा प्रजावती पुष्टिः पिनाकीपरिकीर्तिता। प्राणहा प्राणरूपा च प्राणदा च प्रियंवदा।100।

फणिभूता फणावेशी फकाराकुण्ठमालिनी। फणिराड्वृतसर्वांगी फलभागनिवासिनी।101।

बलभद्रस्य भगिनी बाला बालप्रदायिनी। फल्गुरूपा प्रलम्बघ्नी फल्गूत्सवविनोदिनी।102।

भवानी भवपत्नी च भवभातिहरा भवा। भवेश्वरी भवाराध्या भवेशी भवदायिका।103।

भवमाता भवागम्या भवकण्टकनाशिनी। भवप्रिया भवानन्दा भव्या च भवमोचिनी।104।

भावनीया भगवती भवभारविनाशिनी। भूतधात्री च भूतेशी भूतस्था भूतरूपिणी।105।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

भूतमाता च भूतघ्नी भूतपंचकवासिनी। भोगोपचारकुशला भिस्साधात्री च भूचरी।।106।

भीतिघ्नी भक्तिगम्या च भक्तानामार्तिनाशिनी। भक्तानुकम्पिनी भीमा भगिनी भगनायिका।।107।

भगविद्या भगक्लिन्ना भगयोनिर्भगप्रदा। भगेशी भगरूपा च भगगुह्या भगापहा।।108।

भगोदरी भगानन्दा भाग्यदा भगमालिनी। भोगप्रदा भोगवासा भोगमूला च भोगिनी।।109।

भेरुण्डा भेदिनी भीमा भद्रकाली भिदोज्झिता। भैरवी भुवनेशानी भुवना भुवनेश्वरी।।110।

भीमाक्षी भारती चैव भैरवाष्टकसेविता। भास्वरा भास्वती भीतिर्भास्वदुत्तानशालिनी।।111।

भागीरथी भोगवती भवघ्नी भुवनात्मिका। भूतिदा भूतिरूपा च भूतस्था भूतवर्धिनी।।112।

माहेश्वरी महामाया महातेजा महासुरी। महाजिह्वा महालोला महाद्रंष्ट्रा महाभुजा।।113।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

महामोहान्धकारघ्नी महामोक्षप्रदायिनी। महादारिद्र्यशमनी महाशत्रुविमर्दनी ।।114।

महाशक्तिर्महाज्योतिर्महासुरविमर्दिनी। महाकाया महावीर्या महापातकनाशिनी ।।115।

महारवा मंत्रमयी मणिपूरनिवासिनी। मानसी मानदा मान्या मनश्चक्षुरगोचरा ।।116।

माहेन्द्री मधुरा माया महिषासुरमर्दिनी। महाकुण्डलिनी शक्तिर्महाविभववर्धिनी ।।117।

मानसी माधवी मेधा मतिदा मतिधारिणी। मेनकागर्भसम्भूता मेनकाभगिनी मतिः ।।118।

महोदरी मुक्तकेशी मुक्तिकामार्थसिद्धिदा। माहेशी महिषारूढा मधुदैत्यविमर्दिनी ।।119।

महाव्रता महामूर्धा महाभयविनाशिनी। मातंगी मत्तमातंगी मातंगकुलमण्डिता ।।120।

महाघोरा माननीया मत्तमातंगगामिनी। मुक्ताहारलतोपेता मदघूर्णितलोचना ।।121।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

महापराधराशिघ्नी महाचौरभयापहा। महाचिन्त्यस्वरूपा च मणिमंत्रमहौषधी।।122।

मणिमण्डपमध्यस्था मणिमालाविराजिता। मंत्रात्मिका मंत्रगम्या मंत्रमाता सुमन्त्रिणी।।123।

मेरुमन्दिरमध्यस्था मकराकृतिकुण्डला। मन्थरा च महासूक्ष्मा महादूती महेश्वरी।।124।

मालिनी मानवी माध्वी मदरूपा मदोत्कटा। मदिरा मधुरा चैव मोदिनी च महोद्धता।।125।

मंगलांगी मधुमयी मधुपानपरायणा। मनोरमा रमामाता राजराजेश्वरी रमा।।126।

राजमान्या राजपूज्या रक्तोत्पलविभूषणा। राजीवलोचना रामा राधिका रामवल्लभा।।127।

शाकिनी डाकिनी चैव लावण्याम्बुधिवीचिका। रुद्राणी रुद्ररूपा च रौद्रा रुद्रार्तिनाशिनी।।128।

रक्तप्रिया रक्तवस्त्रा रक्ताक्षी रक्तलोचना। रक्तकेशी रक्तदंष्ट्रा रक्तचन्दनचर्चिता।।129।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

रक्तांगी रक्तभूषा च रक्तबीजनिपातिनी। रागादिदोषरहिता रतिजा रतिदायिनी।।130।

विश्वेश्वरी विशालाक्षी विन्ध्यपीठनिवासिनी। विश्वभूर्वीरविद्या च वीरसूर्वीरनन्दिनी।।131।

वीरेश्वरी विशालाक्षी विष्णुमाया विमोहनी। विद्यावी विष्णुरूपा च विशालनयनोत्पला।।132।

विष्णुमाता च विश्वात्मा विष्णुजायास्वरूपिणी। ब्रह्मेशी ब्रह्मदा ब्राह्मी ब्रह्माणी ब्रह्मरूपिणी।।133।

द्वारका विश्ववन्द्या च विश्वपाशविमोचिनी। विश्वासकारिणी विश्वा विश्वशक्तिर्विचक्षणा।।134।

बाणचापधरा वीरा बिन्दुस्था बिन्दुमालिनी। षट्चक्रभेदिनी षोढा षोडशारनिवासिनी।।135।

शितिकण्ठप्रिया शान्ता शाकिनी वातरूपिणी। शाश्वती शम्भुवनिता शाम्भवी शिवरूपिणी।।136।

शिवमाता च शिवदा शिवा शिवहृदासना। शुक्लाम्बरा शीतला च शीला शीलप्रदायिनी।।137।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

शिशुप्रिया वैद्यविद्या शालग्रामशिला शुचिः। हरिप्रिया हरमूर्तिर्हरिनेत्रकृतालया।।138।

हरिवक्त्रोद्भवा हाला हरिवक्षःस्थलस्थिता। क्षेमंकरी क्षितिः क्षेत्रा क्षुधितस्य प्रपूरणी।।139।

वैश्या च क्षत्रिया शूद्री क्षत्रियाणां कुलेश्वरी। हरपत्नी हराराध्या हरसूर्हररूपिणी।।140।

सर्वानन्दमयी सिद्धिः सर्वरक्षास्वरूपिणी। सर्वदुष्टप्रशमनी सर्वेप्सितफलप्रदा।।141। सर्वसिद्धेश्वराराध्या सर्वमंगलमंगला।

फलश्रुति :- पुण्यं सहस्रनामेदं तव प्रीत्या प्रकाशितम्।।142। गोपनीयं प्रयत्नेन पठनीयं प्रयत्नतः। नातः परतरं पुण्यं नातः परतरं तपः।।143।

नातः परतरं स्तोत्रं नातः परतरा गतिः। स्तोत्रं नामसहस्राख्यं मम वक्त्राद्विनिर्गतम्।।144।

यः पठेत् परया भक्त्या श्रृणुयाद्वा समाहितः। मोक्षार्थी लभते मोक्षं स्वगार्थी स्वर्गमाप्नुयात्।।145।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

कामार्थी लभते कामं धनार्थी लभते धनम्। विद्यार्थी लभते विद्यां यशोऽर्थी लभते यशः।146।

कन्यार्थी लभते कन्यां सुतार्थी लभते सुतान्। मूर्खोऽपि लभते शास्त्रं चोरोऽपि लभते गतिम्।147।

गुर्विणी जनयेत् पुत्रं कन्या विन्दति सत्पतिम्। संक्रान्त्यां च चतुर्दश्यामष्टम्यां च विशेषतः।148।

पौर्णमास्याममावास्यां नवम्यां भौमवासरे। पठेद्वा पाठ्येद्वापि पूजयेद्वापि पुस्तकम्।149।

स मुक्तः सर्वपापेभ्यः कामेश्वरसमो भवेत्। लक्ष्मीवान् सुतवांश्चैव वल्लभः सर्वयोषिताम्।150।

तस्य वश्यं भवेदाशु त्रैलोक्यं सचराचरम्। विद्यानां पारगो विप्रः क्षत्रियो विजयी रणे।151।

वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात्। क्षेत्रे च बहुसस्यं स्याद्गावश्च बहुदुग्धदाः।152।

नाशुभं नापदस्तस्य न भयं नृपशत्रुतः। जायते नाशुभा बुद्धिर्लभते कुलपूज्यताम्।153।

न बाधन्ते ग्रहास्तस्य न रक्षांसि न पन्नगाः। न पिशाचा न डाकिन्यो भूतबेतालडम्भकाः।।154।

बालग्रहाभिभूतानां बालानां शान्तिकारकम्। द्वन्द्वानां प्रतिभेदे च मैत्रीकरणमुत्तमम्।।155।

लोहपाशैर्दृढैर्बद्धो बन्दी वेश्मनि दुर्गमे। तिष्ठंछृण्वन्पठन्मर्त्यो मुच्यते नात्र संशयः।।156।

पश्यन्ति नहि ते शोकं वियोगं चिरजीविनः। श्रृण्वती बद्धगर्भा च सुखं सैव प्रसूयते।।157।

एकदा पठनादेव सर्वपापक्षयो भवेत्। नश्यन्ति च महारोगा दशधावर्तनेन च।।158।

शतधावर्तने चैव वाचां सिद्धिः प्रजायते। नवरात्रे जिताहारो दृढबुद्धिर्जितेन्द्रियः।।159।

अम्बिकायतने विद्वान् शुचिष्मान् मूर्तिसंनिधौ। एकाकी च दशावर्तं पठन् धीरश्च निर्भयः।।160।

साक्षाद्भगवती तस्मै प्रयच्छेदीप्सितं फलम्। सिद्धपीठे गिरौ रम्ये सिद्धक्षेत्रे सुरालये।।161।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

पठनात् साधकस्याशु सिद्धिर्भवति वांछिता। दशावर्तं पठेन्नित्यं भूमिशायी नरः शुचिः।162।

स्वप्ने मूर्तिमयीं देवीं वरदां सोऽपि पश्यति। आवर्तनसहस्रैर्ये जपन्ति पुरुषोत्तमाः।163।

ते सिद्धाः सिद्धिदा लोके शापानुग्रहणक्षमाः। प्रयच्छन्तश्च सर्वस्वं सेवन्ते तान्महीश्वराः।164।

भूर्जपत्रेष्टगंधेन लिखित्वा तु शुभे दिने। धारयेद्यन्त्रितं शीर्षे पूजयित्वा कुमारिकाम्।165।

ब्राह्मणान् वरनारीश्च धूपैः कुसुमचन्दनैः। क्षीरखण्डादिभोज्यांश्च भोजयित्वा सुभक्तितः।166।

बध्नन्ति ये महारक्षां बालानां च विशेषतः। रुद्रं दृष्ट्वा यथा देवं विष्णुं दृष्ट्वा च दानवाः।167।

पन्नगा गरुडं दृष्ट्वा सिंहं दृष्ट्वा यथा गजाः। मण्डूका भोगिनं दृष्ट्वा मार्जारं मूषिकास्तथा।168।

विघ्नभूताः पलायन्ते तस्य वक्त्रविलोकनात्। अग्निचौरभयं तस्य कदाचिन्नैव सम्भवेत्।169।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

पातकान् विविधान सोऽपि मेरुमन्दरसंनिभान्। भस्मितान् कुरुते क्षिप्रं तृणं वह्निहुतं यथा।।170।

नृपाश्च वश्यतां यान्ति नृपपूज्याश्च ते नराः। महार्णवे महानद्यां पोतस्थे च न भीः क्वचित्।।171।

रणे द्यूते विवादे च विजयं प्राप्नुवन्ति ते। सर्वत्र पूजितो लौकर्बहुमानपुरः सरैः।।172।

रतिरागविवृद्धाश्च विह्वलाः कामपीडिताः। यौवनाक्रान्त देहास्तान् श्रयन्ते वामलोचनाः।।173।

सहस्त्रं जपते यस्तु खेचरो जायते नरः। सहस्त्रदशकं देवि यः पठेद्भक्तिमान् नरः।।174।

या तस्य जगतां धात्री प्रत्यक्षा भवति ध्रुवम्। लक्षं पूर्णं यदा देवी स्तोत्रराजं जपेत् सुधीः।।175।

भवपाशविनिर्मुक्तो मम तुल्यो न संशयः। सर्वतीर्थेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम्।।176।

सर्वधर्मेषु यज्ञेषु सर्वदानेषु यत्फलम्। सर्ववेदेषु प्रोक्तेषु यत्फलं परिकीर्तितम्।।177।

Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

तत्पुण्यं कोटिगुणितं सकृज्जप्त्वा लभेन्नरः। देहान्ते परमं स्थानं यत्सुरैरपि दुर्लभम्। स यास्यति न संदेहः स्तवराजस्य कीर्तनात्।।178।


---

## Books Written by Gurudev Shri Raj Verma ji

- Divya Mantra Sadhana Evam Siddhi




- Shri Baglamukhi Divya Sadhana




Shri Raj Verma ji
Mob +91-9897507933,+91-7500292413
Email - mahakalshakti@gmail.com

Astro • Puja • Vastu

# FALIT JYOTISH AND VASTU SHASTRA CONSULTANT

## FOR ALL DHARMIK POOJA'S

SHRI GANESH PUJA

SHRI SATYANARAYAN PUJA

VASTU SHANTI

WEDDING | SAKHARPUDA | MUNJ

JANANA SHANTI | RUDRABHISHEK

SAPTASHATI PATH | HAVAN | ETC.

## HARI OM DHARMIK PUJA VIDHI KENDRA

**SANPADA OFFICE**
Office No. 8, 1st Floor, Shiva Triveni
Galleria CHS., Plot No. 13, Sector 8,
Sanpada, Navi Mumbai - 400705.

**GOVANDI OFFICE**
Shri Swaybhu Hanuman Mandir,
Deonar Mahanagarpalika Vasahat,
Govandi, Mumbai - 400043.

YouTube hariom astrologers
hariom astrologers
hariom_astrologers
hariomastrologers@gmail.com
www.hariomastrologers.com